# याज्ञवल्क्यचिन्तनम्

अद्यापि स्मृतिग्रन्थानां मानवजीवने उपयोगिता सर्वत्र विद्यते । तेषु याज्ञवल्क्यस्मृतेः स्थानमतीवोत्कृष्टम् । प्राचीनपरम्परानुसारेण अस्य प्रणेता महर्षिः याज्ञवल्क्यः अस्ति । ग्रन्थोऽयं त्रिषु अध्यायेषु विभक्तः – आचाराध्यायः व्यवहाराध्यायः प्रायश्चिताध्यायश्चेति । 'आचारः परमो धर्मः' इति विचार्य आचाराध्यायात् केचित् श्लोकाः पाठेऽस्मिन् प्रदीयन्ते ।

**ब्राह्मे मुहूर्ते चोत्थाय चिन्तयेदात्मनो हितम् ।**
**धर्मार्थकामान्स्वे काले यथाशक्ति न हापयेत् ॥1॥**

**अन्वयः** – ब्राह्मे मुहूर्ते उत्थाय आत्मनः हितं च चिन्तयेत् । धर्मार्थकामान् स्वे काले यथाशक्ति न हापयेत् ।

**शब्दार्थः** –

| | | |
|---|---|---|
| ब्राह्मे मुहूर्ते | - | प्रातः काले |
| उत्थाय | - | प्रबुद्ध्य (उठकर) |
| आत्मनः | - | स्वस्य |
| हितम् | - | कल्याणं (कृतं करिष्यमाणञ्च लाभप्रदम्) |
| चिन्तयेत् | - | विचारयेत् |
| धर्मार्थकामान् | - | धर्मार्थकामपुरुषार्थान् |
| स्वे काले | - | उचितावसरे |
| यथाशक्ति | - | सामर्थ्यानुसारं |
| न हापयेत् | - | न परित्यजेत् |

**अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।**
**दानं दमो दया क्षान्तिः सर्वेषां धर्मसाधनम् ॥2॥**

**अन्वयः** – अहिंसा सत्यम् अस्तेयं शौचम् इन्द्रियनिग्रहः दानं दमः दया क्षान्तिः सर्वेषां धर्मसाधनम् ।

**शब्दार्थः** –

| | | |
|---|---|---|
| अहिंसा | - | हिंसा-प्राणिपीडा, तस्या अकरणमहिंसा |
| सत्यम् | - | यथार्थवचनम् |
| अस्तेयम् | - | अचौर्यम् |
| शौचं | - | बाह्याभ्यन्तरपवित्रता |
| इन्द्रियनिग्रहः | - | ज्ञानकर्मेन्द्रियाणाम् अवरोधकः |
| दमः | - | बाह्य करणसंयमः |

| | | |
|---|---|---|
| दया | - | करुणा |
| क्षान्तिः | - | क्षमा |
| धर्मसाधनम् | - | धर्मोपकरणम् |

**जलं पिबेन्नाञ्जलिना न शयानं प्रबोधयेत् ।**

**नाक्षैः क्रीडेन्न धर्मघ्नैर्व्याधितैर्वा न संविशेत् ॥3॥**

**अन्वयः** - अञ्जलिना जलं न पिबेत्, शयानं न प्रबोधयेत् । अक्षैः धर्मघ्नैः न क्रीडेत्, व्याधितैः न संविशेत् ।

**शब्दार्थः** -

| | | |
|---|---|---|
| जलम् | - | नीरम् |
| न पिबेत् | - | पानं न कुर्यात् |
| शयानम् | - | सुप्तं जनम् |
| प्रबोधयेत् | - | उत्थापयेत् |
| अक्षैः | - | पासैः |
| धर्मघ्नैः | - | धर्मघातकैः |
| व्याधितैः | - | ज्वराद्यभिभूतैः |
| संविशेत् | - | सह शयीत |

**न विद्यया केवलया तपसा वापि पात्रता ।**

**यत्र वृत्तमिमे चोभे तद्धि पात्रं प्रकीर्तितम् ॥4॥**

**अन्वयः** - केवलया विद्यया नापि तपसा वा पात्रता । यत्र च इमे उभे वृत्तम् तत् पात्रं प्रकीर्तितम् हि ।

**शब्दार्थः** -

| | | |
|---|---|---|
| वृत्तम् | - | अनुष्ठानम् |
| तत् | - | तथाभूतम् |
| पात्रम् | - | योग्यम् |
| प्रकीर्तितम् | - | कथितम् |
| हि | - | निश्चयेन |

**विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः ।**

**गृह्णन्प्रदातारमधो नयत्यात्मानमेव च ॥5॥**

**अन्वयः** - विद्यातपोभ्यां हीनेन प्रतिग्रहः न ग्राह्यः । गृह्णन् आत्मानं प्रदातारम् एव च अधो नयति ।

**शब्दार्थः** -

| | | |
|---|---|---|
| हीनेन | - | रहितेन |
| प्रतिग्रहः | - | दानम् |
| ग्राह्यः | - | स्वीकरणीयः |

| | | |
|---|---|---|
| ग्रह्णन् | - | स्वीकुर्वन् |
| आत्मानम् | - | स्वम् |
| प्रदातारम् | - | दानदातारम् |
| अधो | - | नरकम् |
| नयति | - | प्रापयति |

**प्रतिग्रहसमर्थोऽपि नादत्ते यः प्रतिग्रहम् ।**

**ये लोका दानशीलानां स तानाप्नोति पुष्कलान् ॥6॥**

**अन्वयः** - यः प्रतिग्रहसमर्थः अपि प्रतिग्रहम् न आदत्ते, सः दानशीलानां ये लोकाः तान् पुष्कलान् आप्नोति।

**शब्दार्थः** -

| | | |
|---|---|---|
| प्रतिग्रहसमर्थः | - | दानग्रहणेसशक्तः |
| प्रतिग्रहम् | - | दानम् |
| न आदत्ते | - | न स्वीकरोति |
| सः | - | असौ |
| दानीशीलानां | - | दानप्रदातृणाम् |
| पुष्कलान् | - | अधिकान् |
| आप्नोति | - | प्राप्नोति |

**यथा ह्येकेन चक्रेण रथस्य न गतिर्भवेत् ।**

**एवं पुरुषकारेण विना दैवं न सिद्धयति ॥7॥**

**अन्वयः** - यथा एकेन चक्रेण रथस्य गतिः न भवेत् हि। एवं पुरुषकारेण विना दैवं न सिद्धयति।

**शब्दार्थः** -

| | | |
|---|---|---|
| यथा | - | येन प्रकारेण |
| रथस्य | - | स्यन्दनस्य |
| गतिः | - | गमनम् |
| भवेत् | - | सम्भवेत् |
| हि | - | निश्चयेन |
| एवम् | - | तथैव |
| पुरुषकारेण | - | पौरुषेण |
| दैवम् | - | भाग्यम् |
| न सिद्धयति | - | सफलं न भवति |

दैवे पुरुषकारे च कर्मसिद्धिर्व्यवस्थिता।
तत्र दैवमभिव्यक्तं पौरुषं पौर्वदैहिकम् ॥8॥

**अन्वय:** - कर्मसिद्धि: दैवे पुरुषकारे च व्यवस्थिता। तत्र अभिव्यक्तं पौरुषं पौर्वदैहिकम् दैवम्।

**शब्दार्थ:** -

| | | |
|---|---|---|
| कर्मसिद्धि: | - | फलप्राप्ति: |
| दैवे | - | भाग्ये |
| पुरुषकारे | - | पुरुषार्थे |
| व्यवस्थिता | - | निश्चिता |
| अभिव्यक्तम् | - | प्रकटितम् |
| दैवम् | - | भाग्यम् |
| पौर्वदैहिकम् | - | पूर्वदेहार्जितम् |
| पौरुषम् | - | पुरुषार्थमयं कर्म |

## अभ्यास:

1. **एकपदेन उत्तरत -**

(क) कस्मिन् मुहूर्ते उत्थातव्यम् ?

(ख) पौर्वदैहिकं किम् ?

(ग) केन विना दैवं न सिद्ध्यति ?

(घ) केन प्रतिग्रह: न ग्राह्य: ?

2. **एकवाक्येन उत्तरत -**

(क) सर्वेषां धर्मसाधनं किम् ?

(ख) यथाशक्ति कान् न हापयेत् ?

(ग) कस्य प्रतिग्रह: न ग्राहय: ?

(घ) कै: सह न संविशेत् ?

3. **त्रिचतुर्भिर्वाक्यै: उत्तरत -**

(क) दानशीलानां लोकान् क: आप्नोति ?

(ख) कर्मसिद्धि: कुत्र व्यवस्थिता ?

(ग) दैवं कथं सिद्धयति ?

(घ) कथं पात्रं प्रकीर्तितं भवति ?

4. **रिक्तस्थानानि पूरयत -**

(क) धर्मार्थकामान्स्वे काले ...................... न हापयेत्।

(ख) दानं दमो दया ..................... सर्वेषां धर्मसाधनम्।

(ग) ....................... नादत्ते यः प्रतिग्रहम्।

(घ) .................... पिबेन्नाञ्जलिना न ..................... प्रबोधयेत्।

(ङ) प्रतिग्रहसमर्थोऽपि ........................ यः प्रतिग्रहम्।

5. **युग्ममेलनं कुरुत -**

| | 'अ' | 'आ' |
|---|---|---|
| (क) | आत्मनो हितम् | न गतिर्भवेत् |
| (ख) | एकेन चक्रेण | केवलया |
| (ग) | शयानम् | चिन्तयेत् |
| (घ) | न विद्यया | न प्रबोधयेत् |

6. **शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत =**

(क) अञ्जलिना जलं पिबेत्। ☐

(ख) पुरुषकारेण विना दैवं न सिद्ध्यति। ☐

(ग) दैवं पौर्वदैहिकं पौरुषम् एव। ☐

(घ) आत्मनः हितं न चिन्तयेत्। ☐

7. **अधोलिखितपदानां मूलशब्दं विभक्तिं वचनं च लिखत -**

| पदम् | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| काले | | | |
| सर्वेषाम् | | | |
| अप्सु | | | |
| तपसा | | | |
| विद्यया | | | |
| रथस्य | | | |

8. **अधोलिखितक्रियापदानां धातुं लकारं पुरुषं वचनं च लिखत -**

| क्रियापदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| पिबेत् | | | | |
| नयति | | | | |
| सिद्ध्यति | | | | |
| चिन्तयेत् | | | | |

**9. नामोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत –**

(क) चोत्थाय

(ख) चैनम्

(ग) नाक्षैः

(घ) चोभे

(ङ) नयत्यात्मानम्

**10. नामोल्लेखपूर्वकं समासविग्रहं कुरुत –**

(क) यथाशक्ति

(ख) प्रतिग्रहसमर्थः

(ग) कर्मसिद्धिः

(घ) धर्मसाधनम्

**11. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत –**

(क) यथाशक्ति **धर्मार्थकामान्** न हापयेत्।

(ख) **शयानं** न प्रबोधयेत्।

(ग) एकेन चक्रेण **रथस्य** गतिः न भवेत्।

(घ) **अञ्जलिना** जलं न पिबेत्।

## योग्यताविस्तारः –

- प्रमुखस्मृतीनां नामानि आचार्यात् ज्ञात्वा लिखत।
- अन्यस्मृतिश्लोकान् कण्ठस्थं कुरुत।
- स्मृतिसाहित्यस्य महत्त्वं संक्षेपेण शिक्षकसाहाय्येन लिखत।